# Shri Samba Sadashiva Aksharamala

# श्रीसाम्बसदाशिव अक्षरमाला

## Document Information

Text title : sAMbaa sadAshiva aksharamAlA

File name : sAmbaakshara.itx

Category : akSharamAlA, shiva

Location : doc_shiva

Author : Traditional

Transliterated by : Subramanian Ganesh sgesh at hotmail.com

Proofread by : Subramanian Ganesh

Latest update : June 16, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2025

*sanskritdocuments.org*

# श्रीसाम्बसदाशिव अक्षरमाला

श्रीपरेश्वर मातृकावर्णमालास्तोत्रम् च
अथ श्री साम्ब सदाशिव अक्षरमालास्तवः
साम्ब सदाशिव साम्ब सदाशिव ।
साम्ब सदाशिव साम्ब शिव ॥

अद्भुतविग्रह अमराधीश्वर
अगणित गुणगण अमृत शिव - हर - साम्ब
आनन्दामृत आश्रितरक्षक
आत्मानन्द महेश शिव - हर - साम्ब
इन्दुकलादर इन्द्रादिप्रिय
सुन्दररूप सुरेश शिव - हर - साम्ब
ईश सुरेश महेश जनप्रिय
केशव सेवित कीर्ति शिव - हर - साम्ब
उरगादिप्रिय उरगविभूषण (भूषण शङ्कर)
नरकविनाश नतेश शिव - हर - साम्ब
ऊर्जितदानवनाश परात्पर
आर्जितपापविनाश शिव - हर - साम्ब
ऋग्वेदश्रुति मौलि विभूषण
रविचन्द्राग्नित्रिनेत्र शिव - हर - साम्ब
ॠपनामादि प्रपञ्चविलक्षण
तापनिवारण तत्त्व शिव - हर - साम्ब
ऌह्लिस्वरूप सहस्रकरोत्तम
वागीश्वर वरदेश शिव - हर - साम्ब
ॡताधीश्वर रूपप्रिय हर
वेदान्तप्रिय वेद्य शिव - हर - साम्ब
एकानेक स्वरूप सदाशिव

भोगादिप्रिय पूर्ण शिव - हर - साम्ब
ऐश्वर्याश्रय चिन्मय चिद्घन
सच्चिदानन्द सुरेश शिव - हर - साम्ब
ओङ्कारप्रिय उरगविभूषण
ह्रींङ्कारप्रिय ईश शिव - हर - साम्ब
औरसलालित अन्तकनाशन
गौरिसमेत गिरीश शिव - हर - साम्ब
अम्बरवास चिदम्बर नायक
तुम्बुरु नारद सेव्य शिव - हर - साम्ब
आहारप्रिय अष्ट दिगीश्वर
योगिहृदि प्रियवास शिव - हर - साम्ब
कमलापूजित कैलासप्रिय
करुणासागर काशि शिव - हर - साम्ब
खड्गशूल मृग टङ्कधनुर्धर
विक्रमरूप विश्वेश शिव - हर - साम्ब
गङ्गा गिरिसुत वल्लभ शङ्कर
गणहित सर्वजनेश शिव - हर - साम्ब
घातकभञ्जन पातकनाशन
दीनजनप्रिय दीप्ति शिव - हर - साम्ब
ङान्तास्वरूपानन्द जनाश्रय
वेदस्वरूप वेद्य शिव - हर - साम्ब
चण्डविनाशन सकलजनप्रिय
मण्डलाधीश महेश शिव - हर - साम्ब
छत्रकिरीट सुकुण्डल शोभित
पुत्रप्रिय भुवनेश शिव - हर - साम्ब
जन्मजरा मृत्य्वादि विनाशन
कल्मषरहित काशि शिव - हर - साम्ब
झङ्कारप्रिय भृङ्गिरिटप्रिय
ओङ्कारेश्वर विश्वेश शिव - हर - साम्ब
ज्ञानाज्ञान विनाशन निर्मल
दीनजनप्रिय दीप्ति शिव - हर - साम्ब
टङ्कस्वरूप सहस्रकरोत्तम

वागीश्वर वरदेश शिव - हर - साम्ब
ठक्काद्यायुध सेवित सुरगण
लावण्यामृत लसित शिव - हर - साम्ब
डम्भविनाशन डिण्डिमभूषण
अम्बरवास चिदेक शिव - हर - साम्ब
ढण्ढण्डमरुक धरणीनिश्चल
ढुण्ढिविनायक सेव्य शिव - हर - साम्ब
णाणामणिगण भूषणनिर्गुण
नतजनपूत सनाथ शिव - हर - साम्ब
तत्त्वमस्यादि वाक्यार्थ स्वरूप
नित्यस्वरूप निजेश शिव - हर - साम्ब
स्थावरजङ्गम भुवनविलक्षण
तापनिवारण तत्त्व शिव - हर - साम्ब
दन्तिविनाशन दलितमनोभव
चन्दन लेपित चरण शिव - हर - साम्ब
धरणीधरशुभ धवलविभासित
धनदादिप्रिय दान शिव - हर - साम्ब
नलिनविलोचन नटनमनोहर
अलिकुलभूषण अमृत शिव - हर - साम्ब
पार्वतिनायक पन्नगभूषण
परमानन्द परेश शिव - हर - शाम्ब
भालविलोचन भानुकोटिप्रभ
हालाहलधर अमृत शिव - हर - साम्ब
बन्धविमोचन बृहतीपावन
स्कन्दादिप्रिय कनक शिव - हर - साम्ब
भस्मविलेपन भवभयमोचन
विस्मयरूप विश्वेश शिव - हर - साम्ब
मन्मथनाशन मधुरानायक
मन्दरपर्वतवास शिव - हर - साम्ब
यतिजन हृदयाधिनिवास
विधिविष्ण्वादि सुरेश शिव - हर - साम्ब
रामेश्वरपुर रमणीयमुखाम्बुज

सोमेश्वर सुकृतेश शिव - हर - साम्ब
लङ्काधीश्वर सुरगण सेवित
लावण्यामृत लसित शिव - हर - साम्ब
वरदाभयकर वासुकिभूषण
वनमालादि विभूष शिव - हर - साम्ब
शान्ति स्वरूपातिप्रिय सुन्दर
वागीश्वर वरदेश शिव - हर - साम्ब
षण्मुखजनक सुरेन्द्रमुनिप्रिय
षाड्गुण्यादि समेत शिव - हर - साम्ब
संसारार्णव नाशन शाश्वत
साधुजन प्रियवास शिव - हर - साम्ब
हरपुरुषोत्तम अद्वैतामृत
मुररिपुसेव्य मृडेश शिव - हर - साम्ब
लालित भक्तजनेश निजेश्वर
कालिनटेश्वर काम शिव - हर - साम्ब
क्षररूपाभि प्रियान्वित (सुन्दर) साक्षात्
स्वामिन्नम्बा समेत शिव - हर - साम्ब
साम्ब सदाशिव साम्ब सदाशिव ।
साम्ब सदाशिव साम्ब शिव ।

श्रीशिववर्णमाला
परमशिवाक्षरमालिकास्तोत्रम्
अक्षरमालिकाशिवस्तोत्रम्

Encoded by Subramanian Ganesh

*Shri Samba Sadashiva Aksharamala*
pdf was typeset on June 16, 2025

Please send corrections to *sanskrit@cheerful.com*